# संस्कृत-वार्ता:

**दिनाङ्क :-24.07.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

**केन्द्रीयायव्ययसङ्कल्पनापत्रं**

वित्तमन्त्रीनिर्मलासीतारमन् इत्येषा ह्य: लोकसभायां चतुर्विंशत्यधिक-पञ्चविंशत्यधिक-द्विसहस्रतमवर्षयो: सामान्यं वित्त-सङ्कल्पना-पत्रकं प्रस्तुतवती। इदं नरेन्द्रमोदि-प्रशासनस्य तृतीयकार्यकालस्य प्रथमं पूर्णं वित्तसङ्कल्पना पत्रमस्ति। लोकसभायां केन्द्रीय-वित्तसङ्कल्पना-पत्रकं सम्मुखीकुर्वती वित्तमन्त्री प्रोक्तवती यत् वैश्विकप्रतिकूल-परिस्थिते: अनन्तरमपि भारतीयार्थव्यवस्था शीर्षस्तरं भजते। वित्तमत्री प्रोक्तवती यत् इदं पत्रकं मुख्यतया वृत्ति-कौशल-सूक्ष्मलघुमध्यमोद्योग-मध्यमवर्गेषु केन्द्रितं वर्तते। यतोहि द्विलक्षकोटिरूप्यकाणां परिव्ययेन सह पञ्चवर्षाणाम् अवधौ चतु:कोटि-युवभ्य: पञ्च प्रधानमन्त्रिण: योजनानां पदक्षेपाणाञ्च सङ्ग्रहणस्य घोषणापि जाता। पत्रके एतस्मिन् विकसितभारताय एकां विस्तृत-संरचनां प्रख्यापयन्ती सर्वेभ्य: अवसरप्रदातु: प्रशासनस्य नव-प्राथमिकता: अपि उल्लिखिता:। एतासु प्राथमिकतासु कृषि-वृत्यवसर-कौशल-समावेशि-मानवसंसाधनविकास-सामाजिकन्याय-विनिर्माण-सेवा-नगरीयविकासोर्जा-सुरक्षा-आधारभूतसंरचना-नवाचारानुसन्धान-विकास इत्यादय: समाविष्टास्सन्ति। वित्तमन्त्रिणा नवीनकरव्यवस्थाया: अन्तर्गतं आयप्राप्तकर्मचारिभ्य: आयकरे मानकव्यवकलनं पञ्चाशत्सहस्ररुप्यकेभ्य: संवर्ध्य पञ्चसप्ततिसहस्ररुप्यकाणि यावत् कृतम्। एवमेव निवर्तिवेतन-भोक्तृभ्य: पारिवारिक-वार्षिक वृत्तौ व्यवकलनं पञ्चदशसहस्ररुप्यकेभ्य: पञ्चविंशतिसहस्ररुप्यकाणि यावत् कृतम्। अनेन भूयोऽपि चुत:कोटि वेतनभोगिकर्मिण: निवर्तिवेतनधारकाश्च लाभान्विता: भविष्यन्ति। एदतिरिच्य प्रशासनेन नवीनकरव्यवस्थां प्राप्तकर्तृभ्य: कर-निक्षेप-संरचनायामपि संशोधनं कृतम्। वित्तमन्त्री अस्माकं विकास-आवश्यकताभ्य: वैदेशिक-मूलधनम् आक्रष्टुं वैदेशिकोद्यमेषु निगमितकरस्य मानं चत्वारिंशत् प्रतिशतत: न्यूनीकृत्वा पञ्चत्रिंशत्प्रतिशत-पर्यन्तं कृतवती। प्रशासनेन भारतीयनवाचारं सदृढीकर्तुम् अपि च उद्यमशीलताया: भावं वर्धयितुं सर्वेषां वर्गाणां निवेशकेभ्य: प्रसिद्ध: एंजेलकर: निस्सारित:। एतदतिरिच्य प्रशानेन एकषष्ट्यधिक-नवदशशततमस्य आयकराधिनियमस्यापि व्यापकी समीक्षा करिष्यते इत्यस्यापि घोषणा कृता। अवधेयं वर्तते यत् अस्य वर्षस्य वित्तसङ्कल्पनापत्रे कृषिसम्बद्धेभ्य: क्षेत्रेभ्य: सार्धैकलक्षकोटि-रुप्यकाणां प्रावधानमपि अस्ति।

**प्रधानमन्त्री -प्रतिक्रिया**

प्रधानन्त्री नरेन्द्रमोदी ह्य: केन्द्रीय-वित्त-सङ्कल्पनापत्रकं प्रशंसितवान्। एकस्मिन् दृश्याङ्कन-सन्देशे प्रधानमन्त्रिणा उक्तं यत् अनेन वित्तसङ्कल्पनापत्रकेण समाजस्य प्रत्येक: वर्ग: लाभान्वितो भविष्यति। प्रधानमन्त्रिणा कथितं यत् इदं पत्रकं विकासशीलभारताय अस्ति यत् समावेशिविकासं सुनिश्चितं करोति, समाजस्य सर्वेभ्य: वर्गेभ्य: हितकरं वर्तते तथा च विकसितभारताय मार्गं प्रशस्तीकरोति। तेनोक्तं यत् प्रशासनेन वृत्ति-सम्बद्ध-प्रोत्साहन-योजनाया: घोषणा कृता, यया देशे कोटिश: नूतना: वृत्यवसरा: सृजिता: भविष्यन्ति।

**।।इति वार्ता:।।**